कुसुमकृतस्मितचारुविभ्रमामलिरपि चुम्बति मालतीं मुहुः ॥

### ( 14 ) वैश्वदेवी ( 5. 7. )

Def. बाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ।

Sch. of G. म. म. य, य. — — — | — — — | ⏑ — — | ⏑ — —

Ex. अर्चामन्येषां त्वं विहायामराणामद्वैतेनैकं विष्णुमभ्यर्च्य भक्त्या ।
तत्राशेषात्मन्यर्चिते भाविनी ते भ्रातः सम्पन्नाराधना वैश्वदेवी ॥

### ( 15 ) स्रग्विणी ( 6. 6 )

Def. कीर्तितैषा चतू रेफिका स्रग्विणी ।

Sch. of G. र, र, र, र. — ⏑ — | — ⏑ — | — ⏑ — | — ⏑ —

Ex. इन्द्रनीलोपलेनेव या निर्मिता शातकुम्भद्रवालंकृता शोभते ।
नव्यमेघच्छविः पीतवासा हरेर्मूर्तिरास्तां जयायोरसि स्रग्विणी ॥

---

**Metres with 13 Syllables in a quarter.**

## ( अतिजगती )

### ( 1 ) कलहंसः also called सिंहनाद and कुटजा ( 7. 6 )

Def. सजसाः सगौ च कथितः कलहंसः ।

Sch. of G. स, ज, स, स, ग.

Ex. यमुनाविहारकुतुके कलहंसो व्रजकामिनीकमलिनीकृतकेलिः ।
जनचित्तहारिकलकण्ठनिनादः प्रमदं तनोतु तव नन्दतनूजः ॥

### ( 2 ) क्षमा ( also called चंद्रिका and उत्पलिनी 7. 6. )

Def. तुरंगरसयतिर्नौ ततौ गः क्षमा ।

Sch. of G. न, न, त, त, ग.

Ex. इह दुरधिगमैः किंचिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम् ।
अमुमतिविपिनं वेददिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परम् ॥

### ( 3 ) प्रहर्षिणी ( 3. 10 )

Def. त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम् ।

Sch. of G. म, न, ज, र, ग.

Ex. ते रेखाध्वजकुलिशातपत्रचिह्नं सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रुर्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥

### ( 4 ) मंजुभाषिणी ( 5. 7 )

### ( also called प्रबोधिता and सुनंदिनी )

Def. सजसा जगौ च यदि मंजुभाषिणी ।

Sch. of G. स, ज, स, ज, ग.

Ex. अमृतोर्मिशीतलकरेण लालयंस्तनुकांतिरोचितविलोचनो हरे ।
नियतं कलानिधिरसीति बल्लवी मुदमच्युते व्यधित मञ्जुभाषिणी ॥

### ( 5. ) मत्तमयूरी ( 4. 9 )

Def. वेदैरन्ध्रैर्म्तौ यसगा मत्तमयूरः ।

Sch. of G. म, त, य, स, ग.

Ex. हा तातेति क्रन्दितमाकर्ण्य विषण्णस्तस्यान्विष्यन्वेतसगूढं प्रभवं सः ।
शल्यप्रोतं वीक्ष्य सकुम्भं मुनिपुत्रं तापादन्तःशल्य इवासीत्क्षितिपोऽपि ॥

### ( 6 ) रुचिरा ( 4. 9 )

### ( also called प्रभावती )

Def. जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ।



Sch. of G. ज, भ, स, ज, ग.

Ex अभून्नृपो विबुधसखः परन्तपः श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं सनातनः पितरमुपागमत्स्वयम् ॥

---

Metres with 14 Syllables in a quarter.

## ( शक्करी )

### ( 1 ) अपराजिता ( 7. 7. )

Def. ननरसलघुगैः स्वरैरपराजिता ।
Sch. of G. न, न, र, स, ल, ग.

Ex. यदनवधिभुजप्रतापकृतास्पदा यदुनिचयचमूः परैरपराजिता ।
व्यजयत समरे समस्तरिपुव्रजं स जयति जगतां गतिर्गरुडध्वजः ॥

### ( 2 ) असंबाधा ( 5. 9. )

Def. म्तौन्सौ गावक्षग्रहविरतिरसंबाधा ।
Sch. of G. म, त, न, स, ग, ग.

Ex. वीर्याग्नौ येन ज्वलति रणवशात्क्षिप्ते दैत्येन्द्रे जाता धरणिरियमसंबाधा ।
धर्मस्थित्यर्थं प्रकटिततनुसम्बन्धः साधूनां बाधां प्रशमयतु स कंसारिः ॥

### ( 3 ) प्रहरणकलिका ( 7. 7. )

Def. ननभनलगिति प्रहरणकलिका ।
Sch. of G. न, न, भ, न, ल, ग.

Ex. व्यथयति कुसुमप्रहरणकलिका प्रमदवनभवा तव धनुषि तता ।
विरहविपदि मे शरणमिह ततो मधुमथनगुणस्मरणमविरतम् ॥

### ( 4 ) मध्यक्षामा ( 4. 10. )

### (also called हंसश्येनी or कुटिला.)

Def. मध्यक्षामा युगदशविरमा म्भौ न्यौ गौ ।
Sch. of G. म, भ, न, य, ग, ग.

Ex. नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रैरानीलाभैर्विरचितपरभागा रत्नैः ।
ज्योत्स्नाशंकामिह वितरति हंसश्येनी मध्येऽप्यह्नः स्फटिकरजतभित्तिच्छाया ॥

### ( 5 ) वसंततिलका ( 8. 6. )

Def. **ज्ञेयं ( उक्ता ) वसन्ततिलकं ( का ) तभजा जगौ गः ।**
Sch. of G. **त, भ, ज, ज ग, ग.**

Ex. फुल्लं वसन्ततिलकं तिलकं वनाल्या लीलापरं पिककुलं कलमत्र रौति ।
वात्येष पुष्पसुरभिर्मलयाद्रिवातो यातो हरिः स मधुरां विधिना हताः स्मः ॥

### ( 6 ) वासंती ( 4. 6. 4. )

**Def. मात्तो नो मो गौ यदि गदिता वासन्तीयम् ।**
Sch. of G. **म, त, न, म, ग, ग.**

Ex. भ्राम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः श्रीखण्डाद्रेरद्भुतपवनैर्मन्दान्दोला ।
लीलालोला पल्लवविलसद्धस्तोल्लासैः कंसारातौ नृत्यति सदृशी वासन्तीयम् ॥

---

**Metres with fifteen syllables in a quarter.**

## अतिशक्करी ( पंचदशाक्षरा वृत्तिः )

### ( 1 ) तूणकम् ( 4. 4. 4. 3. or 7. 8. )

**Def. तूणकं समानिकापदद्वयं विनान्तिकम् ।**
**Sch. of G. र, ज, र, ज, र.**

Ex. सा सुवर्णकेतकं विकाशि भृङ्गपूरितं पञ्चबाणबाणजालपूर्णहेतितूणकम् ।
राधिका वितर्क्य माधवाद्य मासि माधवे मोहमेति निर्भरं त्वया विना कलानिधे ॥

### ( 2 ) मालिनी ( 8. 7 )

**Def. ननमयययुतेयं मालिनी भोगिलोकैः ।**
**Sch. of G. न, न, म; य, य.**

**Ex. मृगमदकृतचर्चा पीतकौशेयवासा रुचिरशिखिशिखण्डा, बद्धधम्मिल्लपाशा ।
अनृजुनिहितमंसे वंशमुत्क्वाणयन्ती धृतमधुरिपुलीला मालिनी पातु राधा ॥**



### ( 3 ) लीलाखेलः ।

**Def. एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः ।**
**Sch. of G. म, म, म, म, म.**

Ex. पायाद्वो गोविन्दः कालिन्दीकूलक्षोणीचक्रे
रासोल्लासक्रीडद्गोपीभिः सार्धं लीलाखेलः ।
मन्दाकिन्यास्तीरोपान्ते स्वैरक्रीडाभिर्लोलो
यद्वद्देवानामीशः स्वर्वेश्याभिः खेलन्तीभिः ॥

### ( 4 ) शशिकला ( 7. 8 )

**Def. गुरुनिधनमनुलघुरिह शशिकला ।**
**Sch. of G. न, न, न, न, स.**

**Ex. मलयजतिलकसमुदितशशिकला व्रजयुवतिलसदलिकगगनगता ।
सरसिजनयनहृदयसलिलनिधिं व्यतनुत विततरभसपरितरलम् ॥**

The same is called स्रक् when the cæsura is at 6th and 15th syllables, and मणिगुणनिकर when it is at the 8th and 15th syllables; as in

अयि सहचरि रुचिरतरगुणमयी म्रदिमवसतिरनपगतपरिमला ।
स्रगिव निवस विलसदनुपमरसा सुमुखि मुदितदनुजदलनहृदये ॥
नरकरिपुरवतु निखिलसुरगतिरमितमहिमभरसहजनिवसतिः ।
अनवधिमणिगुणनिकरपरिचितः सरिदधिपतिरिव धृततनुविभवः ॥

---

Metres with sixteen syllables in a quarter.

## अष्टिः ( षोडशाक्षरा वृत्तिः )

### (1) चित्रम् ( 8. 8. or 4. 4. 4. 4. )

**Def. चित्रसंज्ञमीरितं समानिकापदद्वयं तु ।**

**Two Pâdas of Samânikâ make one Pâda of Chitra.**
Sch. of G. र, ज, र, ज, र, ग.

Ex. विद्रुमारुणाधरौष्ठशोभिवेणुवाद्यहृष्टबल्लवीजनाङ्गसङ्गजातमुग्धकण्टकाङ्ग ।
त्वां सदैव वासुदेव पुण्यलभ्यपाददेव वन्यपुष्पचित्रकेश संस्मरामि गोपवेश ॥

## ( 2 ) पंचचामरम् ( 8. 8 or 4. 4. 4. 4 )

Def. प्रमाणिकापदद्वयं वदन्ति पंचचामरम् ।
Sch. of G. ज, र, ज, र, ज, ग.

Fx. सुरद्रुमूलमण्डपे विचित्ररत्ननिर्मिते लसद्वितानभूषिते सलीलविभ्रमालसम् ।
सुराङ्गनाभबल्लवीकरप्रपञ्चचामरस्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥

## ( 3 ) वाणिनी.

Def. नजभजरैर्यदा भवति वाणिनी गयुक्तैः ।
Sch. of G. न, ज, भ, ज, र, ग.

Ex. स्फुरतु ममाननेऽद्य ननु वाणि नीतिरम्यं
तव चरणप्रसादपरिपाकतः कवित्वम् ।
भवजलराशिपारकरणक्षमं मुकुन्दं
सततमहं स्तवैः स्वचरितैः स्तवामि नित्यम् ॥

---

Metres with 17 Syllables in a quarter.

## ( अत्यष्टि )

## ( 1 ) नर्दटकम् ( 8. 9 )

Def. यदि भवतो नजौ भजजला गुरु नर्दटकम् ।
Sch. of G. न, ज, भ, ज, ज, ल, ग.

Ex. व्रजवनितावसन्तलतिकाविलसन्मधुपं
मधुमथनं प्रणम्रजनवाञ्छितकल्पतरुम् ।
विभुमभिनौति कोपि सुकृती मुदितेन हृदा
रुचिरपदावलीघटितनर्दटकेन कविः ॥



## ( 2 ) पृथ्वी ( 8. 9. )

Def. जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।
Sc. of G. ज, स, ज, स, य, ल, ग.

Ex. दुरन्तदनुजेश्वरप्रकरदुःस्थपृथ्वीभरं
जहार निजलीलया व्रजकुलेऽवतीर्यांशु यः ।
स एष जगतां गतिर्दुरितभारमस्मादृशां
हरिष्यति हरिः स्तुतिस्मरणचाटुभिस्तोषितः ॥

## ( 2 ) मन्दाक्रान्ता ( 4. 6. 7. )

Def. मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।
Sch, of. G. म, भ, न, त, त, ग, ग.

Ex. प्रेमालापैः प्रियवितरणैः प्रीणितालिङ्गनाद्यै-
र्मन्दाक्रान्ता तदनु नियतं वश्यतामेति बाला ।
एवं शिक्षावचनसुधया राधिकायाः सखीनां
प्रीतः पायात्स्मितसुवदनो देवकीनन्दनो नः ॥

## ( 4 ) वंशपत्रपतितम् ( 10. 7. )

Def. दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ।
Sch. of G. भ, र, न, भ, न, ल, ग.

Ex. सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि
क्षीणपयस्युपेयुषि भिदां जलधरपटले ।
खण्डितविग्रहं बलभिदो धनुरिह विविधाः
पूरयितुं भवन्ति विभवः शिखरमणिरुचः ॥

## ( 5 ) शिखरिणी ( 6. 11. )

Def. रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।
Sch. of G. य, म, न, स, भ, ल, ग.

Ex. करादस्य भ्रष्टे ननु शिखरिणी दृश्यति शिशो-
र्विलीनाः स्मः सत्यं नियतमवधेयं तदाखिलैः ।

इति त्रस्यद्गोपानुचितनिभृतालापजनितं
स्मितं बिभ्रद्देवो जगदवतु गोवर्धनधरः ॥

( 6 ) हरिणी ( 6. 4. 7 )

Def. नसमरसला गः षड्वेदैर्हयैर्हरिणी मता ।
Sch. of G. न; स, म, र, स, ल, ग.
Ex. व्यधित स विधिर्नेत्रं नीत्वा ध्रुवं हरिणीगणाद्-
व्रजमृगदृशां संदोहस्योल्लसन्नयनश्रियम् ।
यदयमनिशं दूर्वाश्यामे मुरारिकलेवरे
व्यकिरदधिकं बद्धाकाङ्क्षे विलोलविलोचनम् ॥

---

Metres with 18 syllables in a quarter

( धृतिः )

( 1 ) चित्रलेखा ( 4. 7. 7. )

Def. मन्दाक्रान्ता नपरलघुयुता कीर्तिता चित्रलेखा ॥
Sch. of G. म, भ, न, य, य, य.
Ex. शङ्केऽमुष्मिन् जगति मृगदृशां साररूपं यदासी-
दाकृष्येदं व्रजयुवतिसभा वेधसा सा व्यधायि ।
नैतादृक्चेत्कथमुदधिसुतामन्तरणाच्युतस्य
प्रीतं तस्यां नयनयुगमभूच्चित्रलेखाद्भुतायाम् ॥

( 2 ) नन्दनम् ( 11. 7. )

Def. नजभजरैस्तु रेफसहितैः शिवैर्हयैर्नन्दनम् ।
Sch. of G. न, ज, भ, ज, र, र.
Ex. तरणिसुतातरङ्गपवनैः सलीलमान्दोलितं
मधुरिपुपादपङ्कजरजःसुपूतपृथ्वीतलम् ।
मुरहरचित्रचेष्टितकलाकलापसंस्मारकं
क्षितितलनन्दनं व्रज सखे सुखाय वृन्दावनम् ॥



( 3 ) नाराचम् ( 8. 5. 5 )

Def. इह ननरचतुष्कसृष्टं तु नाराचमाचक्षते
Sch. of G. न, न, र, र, र, र.
Ex. दिनकरतनयातटीकानने चारु संचारिणी
श्रवणनिकटकृष्टमेणेक्षणा कृष्ण राधा त्वयि ।
ननु विकिरति नेत्रनाराचमेषातिहृच्छेदनं
तदिह मदनविभ्रमोद्भ्रान्तचित्तां विधत्स्व द्रुतम् ॥

---

Metres with 19 Syllables in a quarter.

अतिधृति.

( 1 ) मेघविस्फूर्जिता ( 6. 6. 7 ).

Def. रसर्त्वश्वैर्य्मौ न्सौ ररगुरुयुतौ मेघविस्फूर्जिता स्यात् ।
Sch. of G. य, म, न, स, र, र, ग.
Ex. कदम्बमोदाढ्या विपिनपवनाः केकिनः कान्तकेकाः
विनिद्राः कन्दल्यो दिशि दिशि मुदा दुर्दरा दृप्तनादाः ।
निशानृत्यद्विद्युद्विलसितलसन्मेघविस्फूर्जिता चेत्
प्रियः स्वाधीनोऽसौ दनुजदलनो राज्यमस्मात्किमन्यत् ॥

( 2 ) शार्दूलविक्रीडितम् ( 12. 7 )

Def. सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ।
Sch. of G. म, स, ज, स, त, त, ग.
Ex. गोविन्दं प्रणमोत्तमाङ्ग रसने तं घोषयाहर्निशं
पाणी पूजयतं मनः स्मर पदे तस्यालयं गच्छतम् ।
एवं चेत्कुरुताखिलं मम हितं शीर्षादयस्तद्ध्रुवं
न प्रेक्षे भवतां कृते भवमहाशार्दूलविक्रीडितम् ॥

( 3 ) सुमधुरा ( 7. 6. 6 ).

Def. म्रौ भ्रौ मो नो गुरुश्चेद् हयऋतुरसैरुक्ता सुमधुरा ।

Sch. of G. म, र, भ, न, भ, न, ग.

Ex. वेदार्थान्प्राकृतस्त्वं वदसि न च ते जिह्वा निपतिता
मध्याह्ने वीक्षसेऽर्कं न तव सहसा दृष्टिर्विचलिता ।
दीप्ताग्नौ पाणिमन्तः क्षिपसि स च ते दग्धो भवति नो
चारित्र्याच्चारुदत्तं चलयसि न ते देहं हरति भूः ॥

---

**Metres with 20 Syllables in a quarter.**

## ( कृतिः )

### (1) गीतिका (5. 7. 8).

Def. **सजजा भरौ सलगा यदा कथिता तदा खलु गीतिका ।**

Sch. of G. स, ज, ज, भ, र, स, ल, ग,

Ex. करतालचंचलकङ्कणस्वनमिश्रणेन मनोरमा
रमणीयवेणुनिनादरङ्गिमसङ्गमेन सुखावहा ।
बहुलानुरागनिवासरासससमुद्भवा तव रागिणं
विदधौ हरिं खलु बल्लवीजनचारुचामरगीतिका ॥

### (2) सुवदना (7. 7. 6).

Def. **ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना**

Sch. of G. म, र, भ, न, य, भ, ल, ग.

Ex. प्रत्याहृत्येन्द्रियाणि त्वदितरविषयान्नासाग्रनयना
त्वां ध्यायन्ती निकुञ्जे परकरपुरुषं हर्षोत्थपुलका ।
आनन्दाश्रुप्लुताक्षी वसति सुवदना योगैकरसिका
कामार्तिं त्यक्तुकामा ननु नरकरिपो राधा मम सखी ॥

---

**Metres with 21 Syllables in a quarter.**

## ( प्रकृतिः )

### (1) सरसी ( also called पञ्चकावली, धृतश्रीः )

Def. **नजभजजा जरौ यदि तदा गदिता सरसी कवीश्वरैः ।**



Sch. of G. न, ज, भ, ज, ज, ज, र,

Ex. चिकुरकलापशैवलकृतप्रमदासु लसद्रसोर्मिषु
स्फुटवदनाम्बुजासु विलसद्भुजबालमृणालवल्लिषु ।
कुचयुगचक्रवाकमिथुनानुगतासु कलाकुतूहली
व्यरचयदच्युतो व्रजमृगीनयनासरसीषु विभ्रमम् ॥

### ( 2 ) स्रग्धरा ( 7. 7. 7. )

Def. **म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।**

Sch. of G. म, र, भ, न, य, य, य.

Ex. व्याकोषेन्दीवराभा कनककषलसत्पीतवासाः सुहासा
बर्हैस्त्वन्द्रकान्तैर्वलयितचिकुराचारुकर्णावतंसा ।
अंसव्यासक्तवंशीध्वनिसुखितजगद्बल्लवीभिर्लसन्ती
मूर्तिर्गोपस्य विष्णोरवतु जगति नः स्रग्धरा हारिहारा ॥

---

**Metres with 22 syllables in a quarter.**

## ( आकृती )

### ( 1 ) मदिरा.

Def. **सप्तभकारयुतैकगुरुर्गदितेयमुदारतरा मदिरा ।**

Sch. of G. भ, भ, भ, भ, भ, भ, भ, ग.

Ex. माधवमासिपिकस्वरकेसरपुष्पलसन्मदिरामुदितै-
र्भृङ्गकुलैरुपगीतवने वनमालिनमालि कलानिलयम् ।
कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोजरसं
तं भज माधविकामृदुनर्तनयामुनवातकृतोपगमा ॥

### ( 2 ) हंसी ( 8. 14 ).

Def. **मौ गौ नाश्चत्वारो गो गो वसुभुवनयतिरिति भवति हंसी ।**

Sch. of G. म, म, त, न, न, न, स, ग.

Ex. सार्धं कान्तेनैकान्तेऽसौ विकचकमलमधु सुरभि पिबन्ती
कामक्रीडाकूतस्फीतप्रमदसरसतरमलघु रसन्ती ।

कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे
कंसाराते पश्य स्वेच्छं सरभसगतिरिह विलसति हंसी ॥

---

Metres with 23 syllables in a quarter.

## ( विकृतिः ).

### ( 1 ) अद्रितनया ( also called अश्वललित )

Def. **नजभजभा जभौ, लघुगुरू बुधैस्तु गदितेयमद्रितनया ।**

Sch. of G. न, ज, भ, ज, भ, ज, भ, ल, ग.

Ex. खरतरशौर्यपावकशिखापतङ्गनिभभग्नदृप्तदनुजो
जलधिसुताविलासवसतिः सतां गतिरशेषमान्यमहिमा ॥
भुवनहितावतारचतुरश्चराचरधरोऽवतीर्ण इह हि
क्षितिवलयेऽस्ति कंस शमनस्तवेति तमवोचदद्रितनया ॥

---

Metres with 24, 25, 26 syllables in a *pâda* are omitted as they are very rare.

### दण्डक.

Metres with 27 syllables or more in each *pâda* are designated by the general name *Dandaka*. Many varieties of this are mentioned ( as the number of syllables in each *pâda* may sometimes reach 999 ), such as चंडवृष्टिप्रयात, प्रचितक, मत्तमातंगलीलाकर, सिंहविक्रान्त, कुसुमस्तबक, अनंगशेखर, संग्राम &c; Mál. Mád. V. 23 is an instance of the species last named, having 54 letters to a *pâda*.

---

SECTION II.

## अर्धसमवृत्तानि.

or

Metres with their alternate quarters similar.

### ( 1 ) उपचित्रम्.

Def. **विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकावुपचित्रम् ।**



Sch. of G. स, स, स, ल, ग ( odd quarter ).
भ, भ, भ, ग, ग ( even quarter ).

Ex. मुरवैरिवपुस्तनुतां मुदं हेमनिभांशुकचंदनलिप्तम् ।
गगनं चपलामिलितं यथा शारदनीरधरैरुपचित्रम् ॥

### ( 2 ) अपरवक्त्रम्.

( sometimes called वैतालीयम्. )

Def. **अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ ।**

Sch. of G. न, न, र, ल, ग ( odd quarter )
न, ज, ज, र ( even quarter ).

Ex. स्फुटसुमधुरवेणुगीतिभिस्तमपरवक्त्रमवेत्य माधवम् ।
मृगयुवतिगणैः समं स्थिता व्रजवनिता धृतचित्तविभ्रमा ॥

### ( 3 ) पुष्पिताग्रा.

( also called औपच्छंदसिक )

Def. **अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा ।**

Sch. of G. न, न, र, य ( odd quarter )
न, ज, ज, र, ग ( even quarter ).

Ex. अथ मदनवधूरुपप्लवान्तं व्यसनकृशा परिपालयांबभूव ।
शशिन इव दिवातनस्य लेखा किरणपरिक्षयधूसरा प्रदोषम् ॥

### ( 4 ) मालभारिणी.

Def. **विषमे ससजे नगे नगे नाविषमस्थ्येण तु मालभारिणीयम् ।**

Sch. of G. स, स, ज, ग, ग ( odd quarter ).
स, भ, र, य, ( even quarter ).

Ex. मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ॥
Śak. III. 23.

### ( 5 ) वियोगिनी.

### ( also called वैतालीय or सुंदरी ).

Def. विषमे ससजा गुरुः समे सभरा लोऽथ गुरुर्वियोगिनी ।

Sch. of G. स, स, ज, ग ( odd quarter ).

स, भ, र, ल, ग ( even quarter ).

Ex. सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥

### ( 6 ) वेगवती.

Def. सयुगात्सगुरू विषमे चेद् भाविह वेगवती युजि भाद्गौ ॥

Sch. of G. स, स, स, ग ( odd quarter ).

भ, भ, भ, ग, ग. ( even quarter ).

Ex. स्मरवेगवती व्रजरामा केशववंशरवैरतिमुग्धा ।
रभसान्नगुरून् गणयंती केलिनिकुंजगृहाय जगाम ॥

### ( 7 ) हरिणप्लुता.

Def. सयुमात्सलघू विषमे गुरुर्युजि नभौ भरकौ हरिणप्लुता ।

Sch. of G. स, स, स, ल, ग ( odd quarter ).

न, भ, भ, र ( even quarter ).

Ex. स्फुटफेनचया हरिणप्लुता बलिमनोज्ञतटा तरणेः सुता ।
कलहंसकुलारवशालिनी विहरतो हरति स्म हरेर्मनः ॥

---

## SECTION III.

### विषमवृत्तानि. ( Unequal Metres ).

The most common metre of this class is called उद्गता

Def. प्रथमे सजौ यदि सलौ च नसजगुरुकाण्यनंतरम् ।
यद्यथ भनजलगाः स्युरथो सजसा जगौ च भवतीयमुद्गता ॥



Sch. of G. स, ज, स, ल ( first quarter )
न, स, ज, ग ( second ,, )
भ, न, ज, ल, ग ( third ,, )
स, ज, स, ज, ग ( fourth ,, )

Ex. अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
क्लांतिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनंजयः ॥ Kir. XII. 1

Another variety of उद्गता is mentioned wherein the third quarter has भ, न, भ, ग instead of भ, न, ज, ल, ग.

Other kinds of metres in which every quarter of the stanza differs in the number of syllables, are included under the general name 'Gâthá.' The same name is applicable to stanzas consisting of any number of quarters other than four.

### जातिः

or

Metres regulated by the number of syllabic instants.

§ 14. The most common variety of metres regulated by syllabic instants is आर्या. It is of nine kinds :—

पथ्या विपुला चपला मुखचपला जघनचपला च ।
गीत्युपगीत्युद्गीतय आर्यागीतिश्च नवधार्या ॥

of these the last four are generally used & deserve notice here.

### आर्या.

Def. यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥

The first and third quarters have each 12 mâtrâs or syllabic instants, the second 18 and the fourth 15.

Ex. येनामन्दमरन्दे दलदरविन्दे दिनान्यनायिषत ।
कुटजे खलु तेनेहा तेनेहा मधुकरेण कथम् ॥

## गीतिः.

**Def.** आर्याप्रथमार्धसमं यस्याः परार्धमीरिता गीतिः ।

*i. e.* the third and fourth quarters of this are respectively similar to the first and second quarters of an Aryá.

**Ex.** पाटीर तव पटीयान्कः परिपाटीमिमामुरीकर्तुम् ।
यत्पिषतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम् ॥

## उपगीतिः.

**Def.** आर्यापरार्धतुल्ये दलद्वये प्राहुरुपगीतिम् ।

*i. e.* the first and third quarters of this metre are like those of an Aryá while the second and fourth quarters contain 15 mâtrâs each.

**Ex.** नवगोपसुन्दरीणां लासोल्लासे मुरारातिम् ।
अस्मारयदुपगीतिः स्वर्गकुरङ्गीदृशां गीतेः ॥

## उद्गीतिः.

**Def.** आर्याशकलद्वितये विपरीते पुनरिहोद्गीतिः ।

*i. e.* the first and third quarters of this metre contain 12 syllabic instants respectively; the second and fourth containing 15 and 18 syllabic instants respectively.

**Ex.** नारायणस्य सततमुद्गीतिः संस्मृतिर्भक्त्या ।
अर्चायामासक्तिर्दुस्तरसंसारसागरे तरणिः ॥

## आर्यागीतिः.

**Def.** आर्या प्राग्दलमन्तेऽधिकगुरुतादृक्परार्धमार्यागीतिः ।

*i. e.* the first and third quarters of this metre, as also the second and the fourth quarters must contain 12 and 20 syllabic instants respectively.

**Ex.** चारुसमीरणविपिने हरिणकलङ्ककिरणावली सविलासा ।
आबद्धराममोहा वेलामूले विभावरी परिहीना ॥



## ( १ ) वैतालीयम्.

**Def.** षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्निरन्तराः ।
न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः ॥

The first and third quarters of this metre should contain fourteen syllabic instants, and the second and fourth sixteen each; of these the last eight mâtras should consist of a रगण (– ⏑ –) followed by a short and a long syllable (⏑ –); the syllabic instants in the even quarters should not be at all composed of short syllables or long syllables; and the even syllabic instant in each quarter (*i. e.* the 2nd, 4th and 8th) should not be formed conjointly with the next (*i. e.* 3rd, 5th and 9th).

**Ex.** कुशलं खलु तुभ्यमेव तत् वचनं कृष्णयदभ्यधामहम् ।
उपदेशपराः परेष्वपि स्वविनाशाभिमुखेषु साधवः ॥

## ( २ ) औपच्छन्दसिकम्.

**Def.** पर्यन्तेर्यौ तथैव शेषमौपच्छन्दसिकं सुधीभिरुक्तम् ।

This is the same as Vaitálíya except that at the end of each quarter there must be a र Gaṇa, followed by a य Gaṇa instead of ल and ग *i. e.* it is the same as Vaitálíya with a long syllable added at the end of each quarter.

**Ex.** आतन्वानं सुरारिकान्तास्वौपच्छन्दसिकं हृदो विनोदम् ।
कंसं यो निर्जघान देवो वन्दे तं जगतां स्थितिं दधानम् ॥

# Appendix II.

## DHÂTUKOSHA.

### Abbreviations.

Pre. Present लट्. Im. Imperative लोट्. Imp. Imperfect लङ्. Pot. Potential विधिलिङ्. Perf. Perfect लिट्. P. f. Periphrastic or 1st future लुट्. Fut. simple or 2nd Future लृट्. Con. Conditional लृङ्. Aor. Aorist लुङ्. Ben. Benedictive आशीर्लिङ्. Cau. Causal णिच्. D. or Des. Desiderative सन्. Fr. Frequentative यङन्त or यङ् लुगन्त. P. Parasmaipada; A. Atmanepada; U. Ubhayapada; Pass. Passive; p. p. past Passive participle. Inf. Infinitive. Ger. Gerund. The figures 1, 2, &c. after the roots refer to the conjugations to which the roots belong. Pre. p. Present Participle (शत्रन्त when the root is Parasm; शानजन्त when Atm.) Pot. p. Potential participle.

अंश् 10 U. विभाजने to distribute; अंशयति-ते ( also अंशापयति-ते ) pre. अंशायांचकार—चक्रे—आस—बभूव per. अंशयिता P. fut. आंशयिष्यत् con. आंशिशत्-त Aor. अंश्यात्, अंशयिषीष्ट Ben.

अंस् 10 U. like the above with the only difference of श् for स्.

अंह् 1. A. गतौ to go; अंहते Pre. आनंहे Perf. अंहिता. P. fut. आंहिष्ट Aor. अंहिषीष्ट Ben.; Cau.-अंहयति-ते Pre. आञ्जिहत्-त Aor.

अंह् 10 U. भासने to shine; अंहयति-ते Pre. अंहयांचकार—चक्रे, &c, perf. अंहयिता p. fut. आञ्जिहत-त् Aor. अंह्यात्, अंहयिषीष्ट ben. अंहितुं inf. अंहित. p. p.

अक् 1. P. कुटिलायां गतौ to move tortuously; अकति pre. आक perf. अकिता p.f. अकिष्यति fut. आकीत् aor.; Cau.-अकयति-ते. आकित p.p.

अक्ष् 1 & 5. P. to reach, to pervade, to accumulate; अक्षति-अक्ष्णोति 3 sing. अक्षसि-अक्ष्णोषि 2 sing. अक्षामि-अक्ष्णोमि. 1 sing, pre. आक्षत्-आक्ष्णोत्, आक्षः-आक्ष्णोः; आक्षम्-आक्ष्णवम् Imperf. अक्षतु-अक्ष्णोतु, अक्ष-अक्ष्णुहि, अक्षाणि-अक्ष्णवानि Impera. अक्षेत्-अक्ष्णुयात् अक्षेः-अक्ष्णुयाः; अक्षेयम्-अक्ष्णुयाम् pot. आनक्ष perf. अक्षिता-अष्टा

p. f. अक्षिष्यति-अक्ष्यति fut. अक्ष्यात् ben. आक्षिष्यत्-आक्ष्यत् con. आक्षीत् aor. आक्षिष्टाम्-आष्टाम् 3rd dual, आक्षिषुः-आक्षुः 3rd pl. अचिक्षिषति-अचिक्षति Des. Pass.—अक्ष्यते pre. आक्षि aor. Cau.—अक्षयति-ते pre. आचिक्षत्—त aor. अष्ट p.p. अक्षित्वा-अष्ट्वा ger. अक्षितुम्, अष्टुम् inf. आनक्षवस् Perf. Part.

अग् 1 P. कुटिलायां गतौ to move tortuously; अगति pre. आग perf. अगिता p. fut. आगीत् aor.

अघ् 10 U. पापकरणे to go wrong, to sin; अघयति-ते pre. अघयांचकार-चक्रे &c. peri. अघयिता p. f. आजिघत्-त aor. अघ्यात्-अघयिषीष्ट ben.

अङ्क् 1 A. लक्षणे to mark; अङ्कते pre. अनाङ्क perf. अङ्किता p. f. अङ्किष्यते fut. आङ्किष्यत con. अङ्किषीष्ट ben. आङ्किष्ट aor. अञ्चिकिषते des.pass-अङ्क्यते.

अङ्क् 10 U. पदे लक्षणे च to count, to mark or stain, to stigmatise; अङ्कयति-ते pre. अङ्कयांबभूव-आस-अङ्कयांचकार-चक्रे perf. अङ्कयिता P. f. अङ्कयिष्यति-ते fut. आङ्कयिष्यत्-त con. आञ्चकत्-त aor. अङ्क्यात्-अङ्कयिषीष्ट ben. अञ्चिकयिषति—ते des. Pass. -अङ्क्यते ( also अङ्काप्यते ).

अङ्ग 1 P. to go; अंगति pre. आनङ्ग perf. अंगिता p. f. आङ्गीत् aor. अञ्जिगिषति des. अंगितुं inf.

अङ्ग 10 U. same as अङ्क.

अंघ् 1 A. गत्याक्षेपे to go, to blame; अंघते pre. आनंघे perf. अंघिता p. f. आंघिष्ट aor. अंघिषीष्ट ben. अञ्जिघिषति des.

अच् 1 U. गतौ अविस्पष्टकथने च to go, to speak indistinctly; अचति-ते pre. आच or आचे perf. अचिता p. f. आचीत्—आचिष्ट aor. अचिचिषति-ते des. अक्त pp. अचित्वा, अक्त्वा ger.

अज् I. P. गतिक्षेपणयोः to go, to run, to censure; अजति pre. विवाय, विव्यिव, आजिव, विव्यिम, आजिम Ist d. and pl. विवयिथ-विवेथ, आजिथ 2nd sing. perf. वेता or अजिता p. f. वेष्यति, अजिष्यति fut. अवेष्यत्-आजिष्यत् con. अवैषीत्-आजीत् aor. वीयात् ben. विवीषति-अजिजिषति des. वीत or अजित p.p. वीत्वा or अजित्वा, संवीय



ger. Cau.—वाययति—ते pre. अवीवयत्—त aor. Pass.—वीयते pre. विव्ये perf. वायिता, वेता, अजिता p. f. वायिष्यते—वेष्यते-अजिष्यते fut. वायिषीष्ट, वेषीष्ट—अजिषीष्ट ben. अवायिष्यत—अवेष्यत—आजिष्यत con. अवायि 3rd sing अवायिषाताम्—अवेषाताम्—आजिषाताम् 3rd dual; अवायिढ्वम्-ढ्वम्—अवेढ्वम्-आजिढ्वम् 2. pl. aor.

अञ्च् 1 P. गतिपूजनयोः to go, to worship; अञ्चति pre. आनञ्च perf. अञ्चिता p. f. आञ्चिष्यति fut. अच्यात may he go. अञ्च्यात् may he worship. ben. आञ्चीत् aor. आञ्चिष्यत् con. Cau -अञ्चयति—ते pre. आञ्चिचिषति des. अञ्चित, अक्त, with सम, समक्त p. p. अञ्चित्वा or अक्त्वा ( when it means to go ) ger.

अञ्च् 1 U. गतौ याचने च to go, to beg; अञ्चति-ते pre. आनञ्च-ञ्चे perf. अञ्चिष्यति-ते fut. आञ्चीत्, आञ्चिष्ट aor. pass.—अञ्च्यते अक्त p. p. अञ्चित्वा ger. अञ्चितुम् inf.

अञ्च् 10 U. विशेषणे to individualise; अञ्चयति-ते pre. अञ्चयांचकार—चक्रे &c. perf. अञ्चयिता p. f. आञ्चकत्-त aor अञ्च्यात्, अञ्चयिषीष्ट ben.

( अञ्ज् 7 P. व्यक्तिम्रक्षणकान्तिगतिषु to make clear, to anoint, to decorate, to go; अनक्ति pre. आनक्-ग् imp. अनक्तु, ( अङ्ग्धि 2nd sing. ) Impera. अञ्ज्यात् pot. आनञ्ज perf. आञ्जिता-अङ्क्ता p. f. अञ्जिष्यति, अङ्क्ष्यति fut. आञ्जिष्यत्-आङ्क्ष्यत् con. आञ्जीत् aor. अज्यात् ben. आञ्जिजिषति des. Pass.-अज्यते pre. आञ्जि aor. Cau. अञ्जयति-अञ्जयते pre. आञ्जिजत्-त aor. अक्त p. p आञ्जितव्य,* अङ्क्तव्य, व्यङ्ग्य, pot. p. अञ्जित्वा, अङ्क्त्वा, अक्त्वा ger. with वि- व्यज्य ger. अञ्जितुम्, अङ्क्तुम् inf.

अट् 1 P. गतौ to roam, to wander; अटति pre. आट perf, अटिता p. f. अटिष्यति fut. आटीत् aor. अट्यात् ben. अटिटिषति des. Cau.-आटयति-ते pre. आटिटत् Aor. अटाट्यते Freq.

अट्ट् 1 A. अतिक्रमणहिंसयोः to transgress, to kill; अट्टते pre. आनट्टे perf. अट्टिता p. f. अट्टिष्यते fut. आट्टिष्ट aor. अटिटिषते—अट्टिटिषते des. Cau.—अट्टयति—ते pre. आट्टिटत्-त आट्टिटत्-त aor.

* 'नाञ्चेः पूजायाम्' Pán. VI. 4. 30, अञ्च् in the sense of 'to worship' does not drop its nasal before weak terminations.

अट्ट् 10 U. अनादरे to despise; अटिट्टत्-आट्टिटत् Aor. अट्ट्यात् अट्टयिषीष्ट ben. अट्टयितुम् inf.

अण् 1, P. शब्दे to sound; अणति pre. आण perf. आणिता p. f. आणीत् aor. अणिणिषति des. Cau.-आणयति-ते pre. आणिणत्-त Aor.

अण् 4 A. प्राणने to breathe, to live; अण्यते pre. आणे perf. आणिता p. f. आणिष्यते fut. आणिष्ट aor. अणिषीष्ट ben. अणिणिषते des. Pass.—अण्यते Pre. आणि Aor.

अत् 1 P. सातत्यगमने to go constantly; अतति pre. आत perf. अतिता p. f. अतिष्यति fut. आतिष्यत् con. अत्यात् ben. आतीत् aor. अतितिषति des. Pass.-अत्यते pre. आति aor. Cau.-आतयति-ते pre. आतितत्-त Aor. अतित p.p.

अद् 2 P. भक्षणे to eat; अत्ति per. आदः 2nd sing. आदत्, 3rd sing. Imp. आद, जघास perf. अत्ता p. f. अत्स्यति fut. अघसत् aor. जिघत्सति des. आत्स्यत् con. अद्यात् ben. Cau.—आदयते pre. (also आदयति 'अकर्त्रभिप्राये') आदिदत्-त aor. Pass.—अद्यते pre. आदि-जक्षे perf. जग्ध (and अन्न food) p. p. जग्ध्वा-प्रजग्ध्य ger. अत्तुम् inf.

अन् 2 P. प्राणने to breathe, to live; अनिति pre. आनीः-नः 2nd sing. आनीत्-आनत् 3rd sing. Imp., आन perf. अनिता p. f. आनिष्यत् con. आनीत् aor. अनिनिषति des. Cau.-आनयति-ते pre. आनिनत्-त Aor. Pass.—अन्यते pre. आनि aor. अनित्वा ger. with प्र-प्राण्य.

अन् 4 A. to live; अन्यते pre. आने perf. अनिता p. f. This root is the same as अण्.

अन्त् 1 P. बन्धने to bind; अन्तति pre. अन्तिष्यति fut. आन्तीत् Aor. अन्त्यात् Ben. Cau.-अन्तयति आन्तीत्-त Aor. अन्तितिषति des.

अन्ध् 10 U. दृष्ट्युपघाते दृष्ट्युपसंहारे to be blind, to close the eyes अन्धयति-ते pre. आन्धयिष्यत् con. आन्दधत्-त Aor. अन्ध्यात्, अन्धयिषीष्ट ben. अन्दिधयिषति-ते des.

अभ्र् 1 P. गतौ to go, to wander; अभ्रति pre. आनभ्र perf. आभ्रीत् Aor.

अम् 1 P. गतिशब्दसंभक्तिषु to go, to sound, to eat; अमति pre. आम perf. अमिता p. f. अमिष्यति fut. आमीत् aor. Cau.-आमयति-ते pre. आमिमत्-त Aor. अमिमिषति Des. Pass.—आमि. Aor. अमित-आन्त. p. p.



अम् 10 U. रोगे to afflict with pain; आमयति-ते Pre. आमिमत्-त Aor. अम्यात्-अमयिषीष्ट ben.

अय् 1 A. गतौ to go; अयते, with परा—पलायते pre. अयांचक्रे perf. अयिता p. f. आयिष्ट aor. अयिषीष्ट ben. अयियिषते des. Pass. —अय्यते pre. आयि aor. Cau.—आययति-ते pre. आयियत्-त Aor. अयित्वा, with परा,—पलाय्य, ger.

अर्क् 10 U. तपने स्तवने च to heat, to praise; अर्कयति—ते pre. अर्कयांचकार-चक्रे—आस—बभूव perf. अर्कयिता p. f. आर्चिकत्—त aor. अर्क्यात्, अर्कयिषीष्ट ben. अर्कित p. p.

अर्घ् 1 P. मूल्ये to be worth, to cost; अर्घति pre. आनर्घ perf. अर्घिता p. f. आर्घीत् aor. अर्जिघिषति des. Cau.—अर्घयति-ते pre. आर्जिघत्-त Aor.

अर्च् 1 P. पूजायां to worship; अर्चति pre. आनर्च perf. अर्चिता p. f. अर्चिष्यति fut. आर्चीत् aor. अर्च्यात् Ben. आर्चिचिषति des. Cau. —अर्चयति—ते pre. आर्चिचत्—त aor. Pass.—अर्च्यते pre. आर्चि aor. अर्चित्वा ger.

अर्च् 10 U. to worship; अर्चयति—ते pre. अर्चयाम्बभूव—आस—चकार—चक्रे perf. अर्चयिता p. f. अर्चयिष्यति—ते fut. अर्च्यात्—अर्चयिषीष्ट ben. आर्चयिष्यत्—त con. आर्चिचत्—त aor. अर्चिचयिषति—ते des. Pass.—अर्च्यते pre. आर्चि (आर्चयिषाताम्-आर्चिषाताम् 3rd dual) Aor.

अर्ज् 1. P. अर्जने to procure, to take; अर्जति pre. आनर्ज perf. अर्जिता p. f. अर्जिष्यति fut. आर्जीत् aor. अर्ज्यात् ben. अर्जिजिषति des. Cau.—अर्जयति-ते pre. आर्जिजत्—त aor.

अर्ज् 10 U. (also cau. of the above) प्रतियत्ने संपादने च to procure, to acquire; अर्जयिष्यति fut. अर्जिजयिषति-ते des. Pass.—आर्जि (आर्जयिषाताम्--आर्जिषाताम् dual.) Aor.

अर्थ् 10 A. उपयाच्ञायाम् to request, to sue; अर्थयते pre. अर्थयांच-

भूव-आस-चक्रे perf. अर्थयिता p. f. आर्तथत aor. अर्थयिषीष्ट ben. अर्तिथयिषते des. Pass.— अर्थ्यते, अर्थाप्यते pre. आर्थि Aor.

अर्द् 1 P. गतौ याचने च to go, to beg; अर्दति pre. आनर्द perf. अर्दिता p. f आर्दिष्यत् con. आर्दीत् aor. अर्द्यात् ben. आर्दिदिषति des. Cau. —अर्दयाति—ते pre. आर्दिदत्--त aor. Pass.—अर्द्यते pre. आर्दि aor. अर्दित, समर्ण ( asked ), अभ्यर्ण ( near ) p. p.

अर्द् 10 U. हिंसायाम् to kill; आर्दिदत्—त Aor. अर्द्यात्, अर्दयिषीष्ट ben. अर्दिदयिषति-ते des. Pass.—अर्द्यते pre. आर्दि Aor. अर्दित p. p.

अर्ह् 1 P. पुजायां योग्यत्वे च to worship, to deserve; अर्हति pre. आनर्ह perf. अर्हिता p. f. आर्हिष्यत् con. आर्हीत् aor. अर्ह्यात् ben. अर्जिहिषति des. Pass.—अर्ह्यते pre. आर्हि aor. Cau.—See below अर्ह् 10 U.

अर्ह् 10 U. to worship, to deserve; अर्हयाति-ते pre. अर्हयांबभूव-आस-चकार-चक्रे perf. अर्हयिता p. f. आर्जिहत्-त Aor. अर्ह्यात्-अर्हयिषीष्ट ben. अर्जिहयिषति des. Pass.-अर्ह्यते pre. आर्हि Aor. अर्हयित्वा ger.

अल् 1 U. भूषणपर्याप्तिवारणेषु to adorn, to be competent, to prevent; अलति-ते per. आल—आले perf. अलिता p. f. आलीत्-आलिष्ट aor. Cau.—आलयति-ते pre. आलिलत्-त aor. अलिलिषति-ते des. ( according to some this root is Atm. )

अव् I P. रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छा-दीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु to defend, to protect, to do good, to please, to know ( and a variety of other meanings. ); अवति Pre. आव perf. अविता p. f. आवीत् aor. अव्यात् ben. Cau.—आवयाति-ते pre. आविवत्-त Aor. अवित p. p. Pass.—अव्यते pre. आवि aor.

अश् 5. A. व्याप्तौ संघाते च to pervade, to accumulate; अश्नुते pre. आनशे perf. अशिता-अष्टा p. f. अशिष्यते—अक्ष्यते fut. आशिष्यत, आक्ष्यत con. आशिष्ट-आष्ट aor. अक्षीष्ट, अशिषीष्ट ben. Cau.—आश-यति-ते pre. आशिशत्-त Aor. अशिशिषते des. Pass.—अश्यते pre. आशि aor. अष्ट p. p. अष्ट्वा, अशित्वा, Ger. आशितुम् अष्टुम्, inf.



अश् 9 P. भोजने to eat ( with प्र, to drink ); अश्नाति pre. अशान 2nd sing. Impera. आश perf. अशिता p. f. आशीत् aor. अश्यात् ben. अशिशिषति des. Cau.—आशयति pre. आशिशत् Aor. Pass. —आश्यते pre. आशि Aor. अशित p. p.

अस् 2 P. भुवि to be; अस्ति pre. एधि 2nd pers. sing. Impera. बभूव* perf. भाविता p. f. भविष्यति fut. &c.

अस् 4 P. क्षेपणे to throw; अस्यति pre. आस perf. असिता p. f. आसि-ष्यत् con. आस्थत् aor. अस्यात् ben. असिसिषति des. Cau.—आस-यति-ते pre. आसिसत्—त aor. Pass —अस्यते pre. आसि aor. अस्त p. p. असित्वा, अस्त्वा ger. असितुम् inf.

## आ—

आञ्छ् 1 P. आयामे to lengthen; आञ्छति pre. आञ्छ ( according to some आनाञ्छ ) perf. आञ्छिता p.f. आञ्छिष्यति fut. आञ्छिष्यत् con. आञ्छीत् Aor. आञ्चिच्छिषति des. Cau.—आञ्छयति—ते pre. आञ्चिच्छत्—त Aor.

आन्दोल् 10 U. आन्दोलने to sing, to rock; आन्दूदुलत्—त Aor. आन्दुदोलयिषति—ते des.

आप् 5 P. व्याप्तौ to prevade, to obtain; आप्नोति, आप्नोषि, आप्नोमि 1st, 2nd & 3rd sing. (आप्नुवः 1st dual. आप्नुवन्ति 3rd. plu.) pre. आप्नोत् 3rd Sing ( आप्नवम् 1st sing. आप्नुव 1st dual, आप्नुवन् 3rd plu.) Imp.—आप्नोतु 3rd sing. आप्नवानि 1st sing. आप्नुहि 2nd sing. आप्नुवन्तु 3rd. plu. Impera. आप perf. आप्ता p. f. आप्स्यति fut. आप्स्यत con. आपत् aor. Cau.—आपयति—ते pre. आपिपत्—त aor. आप्त p. p. आप्त्वा ger. आप्तुम् inf.

आप् 1, 10 U. लम्भने to get; आपिपत्—त Aor. ( 10 conj. )

आस् 2 A. to sit; आस्ते pre. आसांचक्रे—बभूव—आस perf. आसिता p. f. आसिष्यते fut. आसिष्यत con. आसिष्ट aor. आसिषीष्ट ben. Pass.—आस्यते pre. Cau.—आसयति.

---

* अस्तेर्भूः । भू is substituted for अस् in the non-conjugational tenses.

## इ—

इ 1 P. गतौ to go; अयति pre. आयत् Imperf. इयाय perf. एता p. f. एष्यति fut. ऐष्यत् con. ऐषीत् Aor. इयात् ben. Cau.—आययति-ते pre. आयियत्—त Aor. इयीषति des. Pass.—ईयते pre. आयि Aor.

इ 2 P. गतौ to go; एति pre. इयाय perf. एता p. fut. एष्यति fut. ऐष्यत् con. अगात् Aor. Pass.—ईयते pre. अगायि—aor. Cau. —गमयति—ते pre. अजीगमत्—त aor. ( with प्रति, प्रत्याययति-ते) जिगमिषति des. ( with प्रति—प्रतीषिषति ).

इ 2 A. with अधि, अध्ययने to study; अधीते pre. अधिजगे perf. अध्येता p. fut. अध्येष्यते fut. अध्यगीष्यत-अध्यैष्यत con. अध्यगीष्ट-अध्यैष्ट aor., अध्येषीष्ट ben. Pass.—अधीयते pre. अध्यगायि-अध्यायि (3rd dual, अध्यगायिषाताम्—अध्यगीषाताम्-अध्यायिषाताम्-अध्यैषाताम् ) aor. अध्यायिता—अध्येता p. fut. अध्यायिष्यते-अध्येष्यते fut. अध्यगायिष्यत—अध्यगीष्यत—अध्यायिषत—अध्यैष्यत con. अध्यायिषीष्ट, अध्येषीष्ट ben. Cau.—अध्यापयति pre. अध्यापिपत्—अध्यजीगपत् aor. अधीत p.p.

इख् 1 P. गतौ to go, to move; एखति pre. इयेख perf. एखिता p. fut. ऐखात् Aor.

इङ्ख् 1 P. to go, to agitate; इङ्गति pre. इङ्गांचकार-बभूव-आस perf. इङ्गिता p. fut. ऐङ्गीत् aor. इङ्गित p.p. [Also A. see Bhag. VI, 16]

इट् 1 P. गतौ to go; एटति pre. इयेट perf. एटिता p. fut ऐटीत् aor.

इन्द् 1 P. परमैश्वर्ये to have great power; इन्दति pre. ऐन्दत् Imperf. इन्दाञ्चकार—बभूव—आस perf. इन्दिता p. fut. इन्दिष्यति fut. ऐन्दिष्यत् con. ऐन्दीत् aor. इन्द्यात् ben. इन्दित p.p.

इन्ध् 7 A. दीप्तौ to shine, to kindle; इन्धे pre. इन्धांचक्रे—आस—बभूव (ईधे in the Veda ) perf. इन्धिता p. fut इन्धिष्यते fut. ऐन्धिष्यत con. ऐन्धिष्ट Aor. इंदिधिषते des. इंधिषीष्ट ben. Pass.—इध्यते pre. Cau.—इन्धयति—ते pre. इद्ध p.p.

इष् 6 P. इच्छायाम् to wish; इच्छति pre. इयेष perf. एष्टा or एषिता



p. fut. एषिष्यति fut. ऐषिष्यत् con. ऐषीत् Aor. एषिषिषति des. इष्यात् ben. Pass.—इष्यते pre. ऐषि aor. Cau.—एषयति—ते pre. ऐषिषत्—त aor. इष्ट्वा or एषित्वा ger. इष्ट p. p.

इष् 4 P. गतौ to go; इष्यति pre. एषिता p. fut. इषित p. p. एषित्वा ger. Other forms like those of the above.

इष् 9 P. *आभीक्ष्ण्ये to repeat; इष्णाति pre. इयेष &c. like those of इष् 6.

## ई—

ई 1 P. गतौ to go; 2 P. to go, to pervade &c.; अयति-एति pre. अयां-चकार-बभूव-आस perf. एता p. fut. एष्यति fut. ऐष्यत् con. ऐषीत् aor.

ई 4 A. to go; ईयते pre. अयांचक्रे perf. एष्यते fut. ऐष्ट Aor. इयीषते des. Cau—आययति-ते pre.

ईक्ष् 1 A. दर्शने to look at, to see, ईक्षते pre. ईक्षां-चक्रे-बभूव—आस perf. ईक्षिता p. fut. ईक्षिष्यते fut. ऐक्षिष्यत con. ईक्षिषीष्ट ben. ऐक्षिष्ट aor. Cau—ईक्षयति-ते pre. ऐचिक्षत्-त aor. ईचिक्षिषते des. Pass—ईक्ष्यते pre. ऐक्षि aor. ईक्षित p. p. ईक्षित्वा ger. ईक्षितुम् inf.

ईज् 1 A. गतिकुत्सनयोः to go, to censure; ईजते pre. ईजांचक्रे perf. ऐजिष्ट aor. ईजित p. p.

ईड् 2 A. स्तुतौ to praise; ईट्टे pre. ईडांचक्रे-बभूव—आस perf; ईडिता p. fut. ईडिष्यते fut. ऐडिष्यत con. ऐडिष्ट aor. ईडिषीष्ट ben. Pass—ईड्यते pre. Cau—ईडयति-ते pre. ऐडिडत्-त aor. ईडित्वा ger. ईडितुम् inf. ईडित p. p.

ईर् 1 P. गतौ to go, to shake; ईरति pre. ईरित p. p.

ईर् 2 A. गतौ to go &c.; ईर्ते pre. ईरांचक्रे perf. ईरिता p. fut ईरिष्यते fut. ऐरिष्यत con. ऐरिष्ट aor. ईरिषीष्ट ben. Cau—ईरयति-ते pre. ऐरिरत्-त aor. ईरित p. p.

---

* According to some, the forms of the p. fut. and the gerund in त्वा of this root are एषिता and एषित्वा only.

ईर् 10 U. क्षेपे to move, to throw; ईरयति—ते pre. ईरयांचकार or चक्रे perf. ऐरिरत–त aor. ईरयिता p. fut. ईरयिष्यति—ते fut. ऐरयिष्यत्–त con. ईर्यात्–ईरयिषीष्ट Ben. ईरित p. p.

ईर्ष्य् 1 P. ईर्ष्यायाम् to envy; ईर्ष्यति pre. ईर्ष्यांचकार-आस-बभूव perf. ईर्ष्यिता p. fut. ईर्ष्यिष्यति fut. ऐर्ष्यिष्वत् con. ऐर्ष्यीत् aor. ईर्ष्यियिषाते or ईर्ष्यिषिषति des. Cau—ईर्ष्ययति–ते pre. ऐर्ष्यियत्—त aor.

ईश् 2 A. ऐश्वर्ये to command, to rule, to possess; ईष्टे pre. ईशांचक्रे-आस-बभूव; perf. ईशिता p. fut. ईशिष्यते fut. ऐशिष्यत् con. ईशिषीष्ट ben. ऐशिष्ट aor. Pass.—ईश्यते pre. ऐशि aor. Cau—ईशयति-ते pre. ऐशिशत्-त Aor. ईशित p. p.

ईष् 1 A. गतिहिंसादर्शनेषु to go, to kill, to see; ईषते pre. इषांचक्रे perf. ईषिता p. fut. ईषिष्यते fut. ऐषिष्यत con. ऐषिष्ट aor. ईशिषीष्ट ben. ईषित p. p.

ईह् 1 A. चेष्टायाम् to aim at; ईहते pre. ईहांचक्रे-आस–बभूव perf. ईहिता p. fut. ईहिष्यते fut. ऐहिष्यत con. ऐहिष्ट aor. ईजिहिषते des. ईहिषीष्ट ben. Cau—ईहयति–ते pre. ऐजिहत्-त aor.

## उ—

उक्ष् 1. P. सेचने to sprinkle, to wet; उक्षति pre. उक्षांचकार—बभूव-आस perf. उक्षिता p. fut. उक्षिष्यति fut. औक्षिष्यत् con. औक्षीत् aor. उक्ष्यात् ben. उचिक्षिषति des. उक्षित p. p.

उख् 1 P. to go, to move; ओखति pre. औखत् imperf. उवोख perf. ओखिता p. fut. ओखिष्यति fut. औखिष्यत् con. औखीत् aor. ओचिखिषति des. उख्यात् ben. Pass—उख्यते pre. Cau.—ओखयति–ते pre. ओखित or उखित p. p. ( also written as उंख–उंखति pre. &c. )

उच् 4 P. समवाये to collect together; उच्यति pre. उवोच perf. ओचिता p. fut. ओचिष्यति fut. औचिष्यत् con. उच्यात् ben. औचत् aor. उचित or उग्न p. p.



उच्छ् 1 P. विवासे to finish, to abandon; उच्छति pre. उच्छामास &c. perf. उच्छिष्यति fut. औच्छित् aor. उचिच्छिषति des. Cau—उच्छयति–ते pre. औचिच्छत्–त aor. उच्छित p. p.

उज्झ् 6 P. उत्सर्गे to abandon, to avoid; उज्झति pre. उज्झांचकार-आस-बभूव perf. उज्झिता p. fut. उज्झिष्यति fut. औज्झिष्यत् con. औज्झीत् aor. Cau—उज्झयति-ते pre. औजिज्झत्-त aor. उजिज्झिषति des. उज्झित p. p.

उञ्छ् 1, 6 P. to glean; उञ्छति pre. उञ्छाञ्चकार perf. उञ्छिष्यति fut. औञ्छीत Aor. उञ्चिच्छिषति des. Cau.—उञ्छयति pre. औञ्चिच्छत्-त des. उञ्छित p. p.

उठ् 1 P. उपघाते to strike, to destroy; ओठति pre उवोठ perf. ओठिता p. fut ओठिष्यति fut. औठीत् Aor. उठित p. p.

उन्द् 7 P. क्लेदने to wet, to moisten; उनत्ति pre. उन्दांचकार &c. perf. उन्दिता p. fut. उन्दिष्यति fut. औन्दिष्यत् con. औन्दीत् aor. उन्दिदिषति des. उत्त or उन्न p. p.

उभ् or उम्भ् 6 P. पूरणे to fill with, to cover over; उभति or उम्भति pre. उवोभ or उम्भाञ्चकार perf. ओभिष्यति or उभिष्यति fut. औभीत् or औम्भीत् aor. उभित or उम्भित p. p.

उर्द् 1 A. माने क्रीडायां च to measure, to play; ऊर्दते pre. ऊर्दाञ्चक्रे–बभूव–आस perf. ऊर्दिता p. fut. ऊर्दिष्यते fut. और्दिष्यत con. और्दिष्ट aor. ऊर्दिदिषते des Cau.—ऊर्दयति·ते pre. और्दिदत्-त aor.

उर्व् 1 P. हिंसायाम् to kill; ऊर्वति pre. ऊर्वांचकार perf. ऊर्विता p. fut और्विष्यत् con. और्वीत् aor.

उष् 1 P. दाहे to burn, to punish; ओषति pre. उवोष, ओषांचकार-आस –बभूव perf. ओषिता p. fut. ओषिष्यति fut. औषिष्यत् con. उष्यात् ben. औषीत् aor. ओषित-उषित p. p.

उर्ह् 1 P. अर्दने to hurt, to kill, to destroy; ओहति pre. उवोह perf. ओहिष्यति fut. औहत्, औहीत् Aor. उहित or ओहित p. p.

## ऊ—

ऊन्—10 U. परिहाणे to lessen; ऊनयति-ते pre. ऊनयिष्यति fut. औननत् -त Aor. ऊनिनयिषति-ते des.

ऊय् 1 A. तन्तुसन्ताने to weave, to sew; ऊयते pre. ऊयांचक्रे-बभूव-आस perf. ऊयिता p. fut. ऊयिष्यते fut. औयिष्यत con. औयिष्ट aor. ऊयिषीष्ट ben. Cau—ऊययति-ते pre. ऊत p. p.

ऊर्ज् 1, 10 U. बलप्राणनयोः to strengthen, to live; ऊर्जति, ऊर्जयति-ते pre. और्जीत, और्जिजत्—त aor.

ऊर्णु 2 U. आच्छादने to cover, to hide; ऊर्णोति, ऊर्णौति or ऊर्णुते pre. ऊर्णुनाव--नव or ऊर्णुनवे perf. ऊर्णविता or ऊर्णुविता p. fut. ऊर्णविष्यति-ते or ऊर्णुविष्यति ते fut. और्णवीत्, और्णावीत, और्णु-वीत्, और्णविष्ट or और्णुविष्ट aor ऊर्णूयात्, ऊर्णविषीष्ट or ऊर्णुविषीष्ट ben. Cau—ऊर्णावयति-ते pre. और्णूनवत्-त aor. Pass. —ऊर्णूयते pre. ऊर्णुनुवे perf. और्णावि aor. ऊर्णविता, ऊर्णाविता or ऊर्णुविता p. fut. ऊर्णविषीष्ट, ऊर्णाविषीष्ट or ऊर्णुविषीष्ट ben. और्णाविष्यत, और्णाविष्यत or और्णुविष्यत con,

ऊर्द् 1 A, to sport, to play; ऊर्दते pre. ( same as उर्द्, )

ऊष् 1 P, रुजायाम् to be diseased or disordered; ऊषति pre. ऊषांचकार &c. perf. औषीत् aor. ऊषित p. p.

ऊह् 1 A. (sometimes P.) वितर्के to conjecture, to reason, to infer; ऊहते pre. औहत imperf. ऊहांचक्रे &c. perf. ऊहिता p. fut. ऊहिष्यते fut. औहिष्यत con. औहिष्ट aor. ऊहिषीष्ट ben. Pass—ऊह्यते pre. औहि aor. Cau—ऊहयति-ते pre. औजिहत्-त aor. ऊहित p. p. ऊहित्वा ger:

## ऋ—

ऋ 1 P. गतिप्रापणयोः to go, to get; ऋच्छति pre. आर्षीत् aor. } आर perf. अर्ता p. fut

ऋ 3 P. to go; इयर्ति pre. आरत् aor. (with सम्, समारत). }



अरिष्यति fut. आरिष्यत् con. अर्यात् ben. Pass.—अर्यते pre. आरि aor. आरे perf. आरिता-आर्ता p. fut. आरिष्यते-अरिष्यते fut. आरिषीष्ट-ऋषीष्ट ben. Cau.—अर्पयति-ते pre. आर्पयत्-त aor. अरिरिषति des. ऋत ( also ऋण debt ) p.p. ऋत्वा Ger.

ऋच् 6 P. स्तुतौ to praise, to shine; ऋचति pre. आनर्च perf. आर्चीत् aor. ऋचित p.p.

ऋच्छ् 6 P. गतीन्द्रियप्रलयमूर्तिभावेषु to become hard, to fail in faculties, to go; ऋच्छति pre. आर्च्छत् Imperf. आनर्च्छ perf. ऋच्छिता p. fut. ऋच्छिष्यति fut. आर्च्छीत् Aor. Cau.—ऋच्छयति-ते Pre. आर्चिच्छत्-त् aor. ऋचिच्छिषति des. ऋच्छित p.p.

ऋज् 1 A. गतिस्थानार्जनोपार्जनेषु to go, to acquire; अर्जते pre. आनृजे perf. अर्जिता p. fut. अर्जिष्यते fut. आर्जिष्यत con. अर्जिष्ट aor. अर्जिजिषते des. अर्जिषीष्ट ben. Pass.—ऋज्यते pre. आर्जि aor. Cau.—अर्जयति-ते pre. आर्जिजत्-त aor. ऋजित p.p.

ऋण् 8 U. to go; ऋणोति-ऋणुते, अर्णोति-अर्णुते pre. आनर्ण, आनृणे perf. अर्णिता p. fut. आर्णीत, आर्णिष्ट-आर्त Aor. अर्णिणिषति-ते des.

ऋत्* जुगुप्सायां कृपायां च to censure, to be compassionate; ऋतीयते pre. ऋतीयांचक्रे &c. or आनर्त perf. ऋतीयिता or अर्तिता p. fut. ऋतीयिष्यते, अर्तिष्यति fut. ऋतीयिषीष्ट-ऋत्यात् ben. आर्तीयिष्ट or आर्तीत aor.

ऋध् 4 p. वृद्धौ to prosper, to please; ऋध्यति pre. आनर्ध perf अर्धिता, p. fut. आर्द्धीत् aor. अर्दिधिषति, ईर्त्सति des. ऋद्ध p. p. अर्धित्वा or ऋद्ध्वा ger.

ऋध् 5 P. to increase, to prosper; ऋध्नोति pre. आर्धीत् aor. ( For the remaining forms see the root ऋध् 4 P. )

ऋफ्, ऋम्फ् 6 P. to kill; ऋफति, ऋंफति pre. आनर्फ, ऋम्फाञ्चकार &c. perf.

ऋष् 6 P. approach, to injure; ऋषति pre. आनर्ष perf. अर्षिता p. fut. अर्षिष्यति fut. आर्षीत् aor. ऋष्ट p.p.

---

*This is not in the Dhátupâtha but it is given in the Sútra "ऋतेरीयङ्"

## ॠ—

ॠ 9 P. to go; to move; ॠणाति pre. अराञ्चकार &c. perf. अरिता or अरीता p. fut. अरिष्यति or अरीष्यति fut. आरीत् aor. ईर्यात् ben. ईर्ण p.p.

## ए—

एज् 1 A. दीप्तौ to shine, P. कम्पने to shake; एजते—ति pre. ऐजत-त् imperf. एजांचक्रे-चकार perf. एजिता p. fut. एजिष्यते-ति fut. ऐजिष्यत-त् con. ऐजिष्ट,-ऐजीत् aor. एजित p.p.

एठ् 1 A. बाधायां to annoy, to resist; एठते pre. एठित pp.

एध्* 1 A. वृद्धौ to grow, to prosper; एधते pre. एधांचक्रे-बभूव-आस perf. एधिता p. fut. एधिष्यते fut. ऐधिष्यत con. ऐधिष्ट aor. एदिधिषते des. एधिषीष्ट Ben. Pass.—एध्यते pre. ऐधि aor. Cau.—एधयति-ते. ऐदिधत्-त Aor. एधित p.p.

एष् 1 A. to go; एषते pre. एषित p.p.

## ओ—

ओखृ† 1 P. शोषणालमर्थयोः to be dry, to adorn, to be sufficient; ओखति pre. ओखांचकार-बभूव-आस perf. ओखिता p. fut. ओखिष्यति fut. औखिष्यत् con. औखीत् aor. ओचिखिषति des. Cau.—ओखयति-ते pre. औचिखत्-त aor.

ओलंड् 10 U. उत्क्षेपणे to throw up; ओलण्डयति-ते pre. ओलण्डित p.p.

## क—

कक् 1 A. लौल्ये to wish to be proud; ककते pre. चकके perf. ककिता p. fut. ककिष्यते fut. अककिष्यत con. अककिष्ट aor.

कख् 1 P. हसने to laugh; कखति pre. चकाख perf. कखिता p. fut. कखिष्यति fut. अकखिष्यत् con. अकखीत्-अकाखीत् aor.

* with उप=उपैधते. † With प्र=प्रोखति.



कङ्क् 1 A. to go; कंकते pre. चकंके perf. कंकिता p. fut. अकंकिष्ट aor. कंकित p.p.

कच् 1 P. रवे to sound; कचति pre. चकाच perf. कचिता p. fut. कचिष्यति fut. अकचिष्यत् con. अक-का-चीत् aor.

कच् 1 A. बन्धने to bind; कचते pre. चकचे perf. कचिता p. fut. कचिष्यते fut. अकचिष्यत con. अकचिष्ट aor.

कट् or कण्ट् 1 P. to go; कटति or कंटति pre. चकाट or चकंट perf. कटिता or कंटिता p. fut. कटिष्यति or कंटिष्यति fut. अकटिष्यत् or अकंटिष्यत् con. अकटीत् or अकंटीत aor.

कठ् 1 P. कृच्छ्रजीवने to live in difficulty; कठति pre. कठिष्यति fut. अकठीत्-अकाठीत् Aor.

कण्ठ् 1 P. 10 U. आध्याने to remember with regret; कंठति-कंठयति-ते pre. चकंठ, कंठयांचकार-चक्रे &c. perf. कंठिता or कंठयिता p. fut. कंठिष्यति, कंठयिष्यति-ते fut. अकंठिष्यत् or अकंठयिष्यत्-त con. अकंठीत्, अचकंठत्-त aor.

कण्ठ् 1 A. शोके to be anxious ( with उत् ); कंठते pre. चकंठे perf. कंठिता p. fut. अकंठिष्ट aor.

कण्ड् 1 U. मदे to be proud; कंडति-ते pre. चकंड or चकंडे perf. कंडिता p. fut. कंडिष्यति-ते fut. अकंडिष्यत्-त con. अकंडीत्-अकंडिष्ट aor.

कण्ड् 10 U. भेदने ( भेदनं वितुषीकरणं ) रक्षणे च to separate the chaff, to protect; कंडयाति—ते pre. कंडयांचकार-चक्रे, &c. perf. कंडयिता p. fut. कंडयिष्यति-ते fut. अचकण्डत्-त aor.

कण् 1 P. आर्तस्वरे to cry in distress; कणति pre. चकाण perf. कणिता p. fut. कणिष्यति fut. अकणिष्यत् con. अकणीत्, अकाणीत् Aor.

कण् 10 U. निमीलने to wink; काणयति-ते pre. अचीकणत्-त, अचकाणत्-त Aor.

कण्डूय् 1 U. गात्रविघर्षणे to rub, to scratch; कंडूयति-ते pre. अकण्डूयीत्, अकण्डूयिष्ट Aor. कण्डूय्यात्, कण्डूयिषीष्ट ben.

कत्थ् 1 A. श्लाघायाम् to praise, to boast; कत्थते pre. चकत्थे perf. कत्थिता p. fut. कत्थिष्यते fut. अकत्थिष्यत con. कत्थिषीष्ट ben. अकत्थिष्ट aor. चिकत्थिषते des. कत्थित p.p.

कथ् 10 U. वाक्यप्रबन्धे to tell; कथयति-ते Pre. कथयांचकार, &c. Perf. कथयिता p. fut. कथयिष्यति-ते fut. अकथयिष्यत्-त con. अचकथत्-त aor. चिकथयिषति-ते des. कथ्यात् or कथयिषीष्ट ben. Pass.—कथ्यते pre.

कद् 1 A. वैक्लव्ये to grieve; कदते pre. चकदे perf. कदिता p. fut. अकदिष्ट aor. कदिषीष्ट ben.

कन् 1 P. दीप्तिकान्तिगतिषु to shine &c.; कनति pre. चकान perf. कनिता p. fut. अकनीत् aor.

कनय् (denom.) कनयति pre.

कम् 1 A. कान्तौ to desire; कामयते pre. चकमे or कामयांचक्रे &c. perf. कामयिता or कमिता p. fut. कामयिष्यते or कमिष्यते fut. अकामयिष्यत or अकमिष्यत con. कामयिषीष्ट or कमिषीष्ट ben. अचीकमत or अचकमत aor. Pass. काम्यते or कम्यते pre. अकामि aor. Cau.—कामयति-ते pre. कान्त p. p. कमित्वा-कान्त्वा, कामयित्वा ger.

कम्प् 1 A. चलने to shake, to tremble; कंपते pre. चकंपे perf. कंपिता p. fut. कंपिष्यते fut. अकंपिष्यत con. कंपिषीष्ट ben. अकंपिष्ट aor. Pass.—कंप्यते pre. Cau.—कंपयति-ते pre. अचकम्पत्-त Aor. चिकम्पिषते des.

कम्ब् 1 P. to go; कम्बति pre. चकम्ब perf. कम्बिता p. fut. अकम्बीत् aor.

कर्ण् 10 U. भेदने to pierce; कर्णयति-ते pre. कर्णयांचकार-चक्रे perf. कर्णयिता p. fut. कर्णयिष्यति-ते fut. अकर्णयिष्यत्-त con. अचकर्णत्-त aor.

कर्त् 10 U. शैथिल्ये to slacken; कर्तयति-ते pre. अचकर्तत्-त Aor.

कल् 1 A. शब्दसंख्यानयोः to sound, to count; कलते pre. चकले perf. कलिता p. fut. कलिष्यते fut. अकलिष्यत con. कलिषीष्ट ben. अकलिष्ट aor. कलित p.p.



कल् 10 U. गतौ संख्याने च to go, to count; कलयति-ते pre. कलयांचकार-चक्रे perf. कलयिता p. fut. कलयिष्यति-ते fut. अकलयिष्यत्-त con. अचकलत्-त aor. चिकलयिषति-ते des. कलित p.p.

कल् 10 U. क्षेपे to throw; कालयति-ते pre. कालयांचकार &c. perf. कालयिष्यति-ते fut. अचीकलत्-त Aor. चिकालयिषति-ते des. Pass. —काल्यते pre. अकालि Aor. कालित p. p.

कव् 1 A. स्तुतौ वर्णने च to praise; कवते pre. चकवे perf. कविता p. fut. कविष्यते fut. अकविष्यत् con. अकविष्ट aor. Cau.-कावयति-ते pre.

कश् 1. P. शब्दे to sound; कशति pre. अकशीत्, अकाशीत् Aor.

कश् 2 A. गतिशासनयोः to go, to punish; कष्टे pre. चकशे perf. कशिता p. fut. अकशिष्ट aor.

कष् 1 P. घर्षणे to test, to scratch; कषति pre. चकाष perf. कषिता p. fut. कषिष्यति fut. अकषिष्यत् con. अकषीत्-अकाषीत् aor. चिकषिषति des. कषित (कष्ट painful p. p.).

कस् 1 P. to go; कसति pre. चकास perf. कसिता p. fut. कसिष्यति fut. अकसिष्यत con. अकासीत्,-अकसीत् aor. चिकसिषति des. Cau. -कासयति-ते pre. अचीकसत्-त aor.

कस् 2 A. गतिनाशनयोः to go, to destroy; कस्ते pre. अकसिष्ट Aor. (Also written कंस्.)

कांक्ष् 1 P. कांक्षायां to desire, to wish; कांक्षति pre. चकांक्ष perf. कांक्षिता p. fut. कांक्षिष्यति fut. अकांक्षिष्यत् con. अकांक्षीत् aor. कांक्ष्यात् ben. चिकांक्षिषति des. कांक्षित p. p.

काश् 1, 4 A. दीप्तौ to shine; काशते or काश्यते pre. चकाशे perf. काशिता p. fut. काशिष्यते fut. अकाशिष्यत con. काशिषीष्ट ben. चिकाशिषते des. अकाशिष्ट aor. Cau. काशयति-ते pre. Pass.—काश्यते pre. काशित p.p. काशित्वा, प्रकाश्य ger.

कास् 1 A. शब्दकुत्सायाम् to cough; कासते pre.—कासांचक्रे &c. perf. कासिता p. fut. कासिष्यते fut. अकासिष्यत con. अकासिष्ट aor. चिकासिषते des. कासिषीष्ट ben. Cau.—कासयति-ते अचकासत्-त aor.

कित् 1 P. संशये रोगापनये च to suspect, to cure; चिकित्सति pre. -चिकित्सांचकार &c. perf. चिकित्सिता p. fut. चिकित्सिष्यति fut. अचिकित्सिष्यत् con. अचिकित्सीत् aor. Pass.-चिकित्स्यते pre. Cau. -चिकित्सयति-ते pre. चिकित्सिषति des. ( Also A. चिकित्सते pre. अचिकित्सिष्ट aor. )

कित् 1 P. इच्छायां to desire, to live; केतति pre. चिकेत perf. अकेतीत् aor.

कित् 10 P. निवासे to dwell; केतयति pre. केतयिष्यति fut. अचीकितत् aor.

किल् 1 P. श्वेतक्रीडनयोः to become white, to sport; किलति pre. चिकेल perf. केलिता p. fut. केलिष्यति fut. अकेलिष्यत् con. अकेलीत् aor.

कील् 1 P. बन्धने to bind; कीलति pre. चिकील perf. कीलिता p. fut. अकीलीत् aor. चिकीलिषति des.

कु 1 A. शब्दे to sound; कवते pre. चुकवे perf. कोता p. fut. कोष्यते fut. अकोष्यत् con. अकोष्ट aor.

कु 2 P. to sound; कौति pre. चुकाव ( चुकविथ, चुकोथ 2nd sing. ) perf. कोता p. fut. कोष्यति fut. अकोष्यत् con. अकौषीत् aor. चोकूयते Freq.

कु 6 A शब्दे ( आर्तस्वरे ) to sound, to moan; कुवते pre. चुकुवे perf. कुता p. fut. अकुत aor. कोकूयते freq.

कुच् 1 P. शब्दे तारे संपर्चनकौटिल्यप्रतिष्टम्भनविलेखनेषु च to sound loudly, to come in contact, to be crooked &c.; कोचति pre. चुकोच perf. कोचिता p. fut. कोचिष्यति fut. अकोचिष्यत् con. अकोचीत् aor.

कुच् 6 P. संकोचने ( कुटादि ) to contract; कुचति pre. चुकोच ( चुकुचिथ 2nd sing. ) perf. अकुचीत् aor. चिकुचिषति des.

कुट् 6 P. to curve, to bend; कुटति pre. चुकोट ( चुकुटिथ 2nd sing. ) perf. कुटिता p. fut. कुटिष्यति fut. अकुटिष्यत् con. अकुटीत् aor. Cau.-कोटयति-ते pre. कुटित p. p.



कुण् 6. P. शब्दोपकरणयोः to sound, to support; कुणति pre. चुकोण perf. कोणिता p. fut अकोणीत् aor. कुणित p. p.

कुण्ट् 1. p. प्रतिघाते to be blunted; कुण्ठति pre. अकुण्ठीत् aor.

कुण्ट् 10. U. वेष्टने to cover; कुण्ठयति-ते pre. अचुकुण्ठत्-त Aor.

कुत्स् 10. A. अवक्षेपणे to abuse; कुत्सयते pre. कुत्सयांचक्रे &c. perf. कुत्सयिष्यते fut. अचुकुत्सत aor. कुत्सयिषीष्ट ben.

कुन्थ् 1. P. हिंसाक्लेशनयोः to kill &c.; कुंथति pre. चुकुंथ perf. कुंथिता p. fut. कुंथिष्यति fut. अकुंथिष्यत con. अकुंथीत् aor. चुकुंथिषति des. Cau.-कुंथयति-ते pre. Pass.-कुन्थ्यते pre. कुन्थित्वा ger. कुन्थित p.p.

कुप् 4 P. क्रोधे to be angry; कुप्यति pre. चुकोप perf. कोपिता p. fut कोपिष्यति fut. अकोपिष्यत् con. अकुपत् aor. चुकोपिषति, चुकुपिषति des. कुप्यात् ben. कुपित p.p. कोपितुम् Inf.

कुप् 10 U. भाषायां द्युतौ च to speak, to shine; कोपयति-ते pre. अचुकुपत्-त Aor.

कुर्द् I A. क्रीडायां to play; कूर्दते perf. चुकूर्दे perf. अकूर्दिष्ट Aor.

कुंश् 10 U. 1 P. दीप्तौ to shine; कुंशयति-ते, कुंशति pre. कुंशयांचकार-चक्रे; चुकुंश perf. कुंशियिता, कुंशिता p. fut. अचुकुंशत-त्, अकुंशीत् aor.

कुष् 9 P. निष्कर्षे to tear, to expel; कुष्णाति pre. चुकोष* perf. कोषिता p. fut कोषिष्यति fut. अकोषीत् aor. चिकोषिषति, चिकुषिषति des. Pass. कुष्यते pre. अकोषि Aor. Cau.-कोषयति-ते pre. अचूकुषत्-त Aor.

कुस् 4 P. संश्लेषणे to embrace; कुस्यति pre चुकोस perf. कोसिता p. fut. कोसिष्यति fut. अकोसिष्यत् con. कुस्यात् Ben. अकुसत् aor. चिकुसिषति, चुकोसिषति des. कुसित्वा, कोसित्वा ger.

कुंस् 10. U. 1 P. भाषायां to speak; कुंसयति-ते, कुंसति pre. अचुकुंसत्-त, अकुंसीत् Aor.

---

